रिति बन्धमोक्षव्यवस्था । अधिकमाकरे दृश्यम् । वैशेषिकास्तु विपर्य्ययसंशयज्ञानमविद्येत्याहुः तत्कारणप्रदर्शन पूर्व्वकमविद्या लक्षिता वै०सू० उपस्कारे च यथा “इन्द्रियदोषात् संस्कारदोषाच्चाविद्या” ॥ “अविद्येति सामान्यवाच्यपि पदं विपर्य्यये वर्त्तते प्रकरणात् संशयस्वप्नानध्यवसायानामसूत्तत्वात्, तत्रेन्द्रियदोषोवातपित्ताद्यभिभवकृतमपाटवम्, संस्कारदोषोविशेषादर्शनसाहित्यं तदधीनं हि मिथ्याज्ञानं जायते” ॥ “तच्च दुष्टज्ञानम्” सू०॥ तदिऽत्यव्ययपदं सर्व्वनामसमानार्थकमविद्यां परामृशति साऽविद्या, दुष्टज्ञानं व्यभिचारि ज्ञानमतस्मिंस्तदितिज्ञानं व्यधिकरणप्रकारावच्छिन्नविशेष्यतावत्त्विप्रकारकमिति यावत्, दोषस्य ज्ञानस्यानिश्चयरूपत्वमपि, तेनैककोटिसत्यत्वेऽपि संशयोदुष्ट एवानवधारणात्मकत्वात्’ तदनेन संशयोविपर्य्ययस्वप्नानध्यवसायानाञ्चतुर्णामप्युपसंग्रहः” उप० ॥ “विद्याविद्याद्वैविध्यात् संशयः” गौ०सू० । नास्ति विद्या शास्त्रादिज्ञानं यस्य । २शास्त्रादिज्ञानशून्ये त्रि० “अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुः” पुरा० । “वैद्योऽविद्याय नाकामो दद्यादंशं स्वतो धनात्” दा०भा० स्मृतिः । “अविद्यानान्तु सर्व्वेषामीहातश्चेद्धनं भवेत्” मनुः” ।

**अविद्वेष** पु० अभावे विरोधे वा न०त० । १विद्वेषाभावे २अनुरागे च । न०ब० । ३विद्वेषशून्ये ४अनुरागयुक्ते च त्रि०

**अविधवा** स्त्री विरोधे न०त० । सधवायां पतिवत्न्यां स्त्रियाम् “इमा नारीरविधवाः सपत्नीः” ऋ० १०,१८ ।

**अविधा** स्त्री अभावे न०त०। प्रकाराभावे न०ब०। प्रकारशून्ये

**अविधान** न० अभावे न०त० । १विधानाभावे २इतिकर्त्तव्यता क्रमाद्यभावे । “अविधानेन यत् कुर्य्यात् तत्सर्व्वं विफलं भवेत्” स्मृतिः न०ब० । ३विधानशून्ये त्रि० ।

**अविधि** पु० अभावे न०त० । विध्यभावे इतिकर्त्तव्यता क्रमाद्यभावे न० ब० । विधानशून्ये त्रि० ।

**अविन** पु० अवति यज्ञम् अव—इनन् । अध्वर्य्यौ उज्ज्व० ।

**अविनय** पु० अभावे न०त० । १विनयाभावे । विरोधे न०त० । २दुर्नये । “अविनयमपनय विष्णो” शङ्करा० “बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः” “वेणोविनष्टोऽविनयान्नहुषश्चैव पार्थिवः” इति च मनुः न०ब० । “विनयशून्ये त्रि० ।

**अविनश्वर** त्रि० विरोधे न०त० । १विनश्वरभिन्ने चिरस्थायिनि, २कूटस्थे परमेश्वरे पु० ।

**अविनाभाव** पु० विना व्यापकम्बृते न भावः स्थितिः अस०स० । १व्यापकस्थित्यनुरोधिसत्तारूपायां व्याप्तौ । २सम्बन्धमात्रे च “अविनाभावोऽत्र सम्बन्धमात्रम्” काव्यप्र० “अथ केयमाकाङ्क्षा न तावत् अविनाभावः” इति शब्दचिन्ता० ।

**अविनाभाविन्** त्रि० न विना व्यापकम् भवति भू—णिनि । व्याप्ये “व्यक्त्याविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते” का०प्र० ।

**अविनाभूत** त्रि० न विना व्यापकम्बृते भूतः । १व्याप्ते २संबन्धमात्रे च “अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते” का०प्र० । [“अविनाशी वा अरे अयमात्मा” श्रुतिः ।

**अविनाशिन्** त्रि० न विनाशी स्त्रियां ङीप् । अविनश्वरे नित्ये

**अविनीत** त्रि० न विनीतः । १विनयशून्ये २कुत्सितक्रियानुरते ३उद्धते ४अदान्ते च । “वहते विनीतमविनीतशासिभिः” माघः । ५अशिक्षिते च “नाविनीतैर्व्रजेद्धुर्य्यैर्न च क्षुद्व्याधिपीड़ितैः” मनुः । ६कुलटायां स्त्री ।

**अविनीय** पु० विनीयः कल्कः कपटञ्च न०ब० । कपटशून्ये “अविनीयसंभ्रमविकाशिभक्तिभिः” माघः ।

**अविनेय** त्रि० न विनेतुं शक्यः । दुर्दमे अश्वादौ ।

**अविन्ध्य** पु० राक्षसभेदे हरिवंशे विवरणम् ।

**अविपट** अवीनां विस्तारः अवि+पटच् । मेषविस्तारे ।

**अविपश्चित्** पु० विरोधे न०त० । विचारशून्ये तात्पर्य्यज्ञानशून्ये २अविवेकिनि च ।

**अविपाक** पु० विशेषेण पच्यते फलरूपेण वि+पच घञ् न०त० । फलरूपेणापरिणते १धर्म्माधर्म्मादौ । ‘विपाकस्य जात्यायुर्भोगाः” इति पातञ्जले उक्तः तद्रूपेणापरिणामस्य फलरूपतयाऽनाविर्भावः विहिताविहितकर्म्मणोविशिष्टदेशकालनियतत्वात् यदा कर्म्म बलीयसा प्रतिबद्धं तदा तत् कर्म्म अविपाक इत्युच्यते । विपाकः अन्नादेः पाकः अभावे न०त० । सुश्रुतोक्ते १पाकाभावे २“अरोचकाविपाकौ तु शर्कराश्च भवन्ति च” । नास्ति विपाको यत्र । अग्निमान्द्यहेतुके ३रोगभेदे च “एतत्सवायसमेतेन जाठर्य्यं न भवति सद्योऽग्निराप्यायते दुर्नामशोफपाण्डुकुष्ठरोगाविपाककासश्वासप्रमेहाश्च न भवन्ति” सुश्रुतः ।

**अविपाल** त्रि० अवीन् पालयति पा—णिच् लः उप०स० । मेषपालके ।

**अविपुल** त्रि० विरोधे न०त० । विपुलभिन्ने क्षुद्रे ।

**अविप्रकृष्ट** त्रि० विरोधे न०त० । सन्निकृष्टे ।

**अविप्रिय** पु० अवीन् मेषान् प्रीणाति प्री—क । १श्यामाकतृणे विप्रियमपकारः न०त० । २अनपकारे ३आनुकूल्ये ।